# Sri T R Chari's stotra collection

# સ્તોત્રાદિ

## Document Information

Text title : stotraadi

File name : tstotra.itx

Category : deities_misc, stotra

Location : doc_deities_misc

Transliterated by : Collection T. R. Chari trchari at hotmail.com

Proofread by : T. R. Chari trchari at hotmail.com

Latest update : November 29, 1998

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# સ્તોત્રાદિ

ૐ
શ્રી લક્ષ્મીનૃસિંહ પરબ્રહ્મણે નમઃ ।
શ્રી પદ્માવતી સમેત વેઙ્કટેશાય નમઃ ।
શ્રી વિષ્ણવે પરમાત્મને નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રી નિગમાન્ત મહા દેશિકાય નમઃ ।
શ્રી સાયિરામ્ ।

---

## ॥ આદિત્યહૃદયમ્ ॥

તતો યુદ્ધપરિશ્રાન્તં સમરે ચિન્તયા સ્થિતમ્ ।
રાવણં ચાગ્રતો દૃષ્ટ્વા યુદ્ધાય સમુપસ્થિતમ્ ॥ ૧ ॥

દૈવતૈશ્ચ સમાગમ્ય દ્રષ્ટુમભ્યાગતો રણમ્ ।
ઉપગમ્યાબ્રવીદ્રામમગસ્ત્યો ભગવાનૃષિઃ ॥ ૨ ॥

રામ રામ મહાબાહો શૃણુ ગુહ્યં સનાતનમ્ ।
યેન સર્વાનરીન્વત્સ સમરે વિજયિષ્યસિ ॥ ૩ ॥

આદિત્યહૃદયં પુણ્યં સર્વશત્રુવિનાશનમ્ ।
જયાવહં જપેન્નિત્યમક્ષય્યં પરમં શુભમ્ ॥ ૪ ॥

સર્વમઙ્ગળમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
ચિન્તાશોક પ્રશમનમાયુર્વર્ધનમુત્તમમ્ ॥ ૫ ॥

રશ્મિમન્તં સમુદ્યન્તં દેવાસુર નમસ્કૃતમ્ ।
પૂજયસ્વ વિવસ્વન્તં ભાસ્કરં ભુવનેશ્વરમ્ ॥ ૬ ॥

સર્વદેવાત્મકો હ્યેષ તેજસ્વી રશ્મિભાવનઃ ।
યેષ દેવાસુરગણાન્ લોકાન્ પાતિ ગભસ્તિભિઃ ॥ ૭ ॥

યેષ બ્રહ્મા ચ વિષ્ણુશ્ચ શિવઃ સ્કન્દઃ પ્રજાપતિઃ ।
મહેન્દ્રો ધનદઃ કાલો યમઃ સોમોહ્યાપામ્પતિઃ ॥ ૮ ॥

પિતરો વસવઃસાધ્યા હ્યશ્વિનૌ મરુતો મનુઃ ।
વાયુર્વહ્નિઃ પ્રજાપ્રાણ ઋતુકર્તા પ્રભાકરઃ ॥ ૯ ॥

આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ।
સુવર્ણસદૃશો ભાનુઃ સ્વર્ણરેતા દિવાકરઃ ॥ ૧૦ ॥

હરિદશ્વઃ સહસ્રાર્ચિઃ સપ્તસપ્તિર્મરીચિમાન્ ।
તિમિરોન્મથનઃ શમ્ભુસ્ત્વષ્ટા માર્તાણ્ડ અંશુમાન્ ॥ ૧૧ ॥

હિરણ્યગર્ભઃ શિશિરસ્તપનો ભાસ્કરો રવિઃ ।
અગ્નિગર્ભોઽદિતેઃ પુત્રઃ શઙ્ખઃ શિશિરનાશનઃ ॥ ૧૨ ॥

વ્યોમનાથસ્તમોભેદી ઋગ્યજુસ્સામપારગઃ ।
ઘનવૃષ્ટિરપાં મિત્રો વિન્ધ્યવીથીપ્લવઙ્ગમઃ ॥ ૧૩ ॥

આતપી મણ્ડલી મૃત્યુઃ પિઙ્ગલઃ સર્વતાપનઃ ।
કવિર્વિશ્વો મહાતેજા રક્તઃ સર્વભવોદ્ભવઃ ॥ ૧૪ ॥

નક્ષત્ર ગ્રહતારાણામધિપો વિશ્વભાવનઃ ।
તેજસામપિ તેજસ્વી દ્વાદશાત્મન્નમોઽસ્તુતે ॥ ૧૫ ॥

નમઃ પૂર્વાય ગિરયે પશ્ચિમાયાદ્રયે નમઃ ।
જ્યોતિર્ગણાનાં પતયે દિનાધિપતયે નમઃ ॥ ૧૬ ॥

જયાય જયભદ્રાય હર્યશ્વાય નમો નમઃ ।
નમો નમઃ સહસ્રાંશો આદિત્યાય નમો નમઃ ॥ ૧૭ ॥

નમ ઉગ્રાય વીરાય સારઙ્ગાય નમો નમઃ ।
નમઃ પદ્મપ્રબોધાય માર્તાણ્ડાય નમો નમઃ ॥ ૧૮ ॥

બ્રહ્મેશાનાચ્યુતેશાય સૂર્યાયાદિત્યવર્ચસે ।
ભાસ્વતે સર્વભક્ષાય રૌદ્રાય વપુષે નમઃ ॥ ૧૯ ॥

તમોઘ્નાય હિમઘ્નાય શત્રુઘ્નાયામિતાત્મને ।
કૃતઘ્નઘ્નાય દેવાય જ્યોતિષાં પતયે નમઃ ॥ ૨૦ ॥

તપ્તચામીકરાભાય વહ્નયે વિશ્વકર્મણે ।
નમસ્તમોઽભિનિઘ્નાય રુચયે લોકસાક્ષિણે ॥ ૨૧ ॥

નાશયત્યેષ વૈ ભૂતં તદેવ સૃજતિ પ્રભુઃ ।
પાયત્યેષ તપત્યેષ વર્ષત્યેષ ગભસ્તિભિઃ ॥ ૨૨ ॥

એષ સુપ્તેષુ જાગર્તિ ભૂતેષુ પરિનિષ્ઠિતઃ ।
એષ એવાગ્નિહોત્રઞ્ચ ફલઞ્ચૈવાગ્નિહોત્રિણામ્ ॥ ૨૩ ॥

વેદાશ્ચ ક્રતવશ્ચૈવ ક્રતૂનાં ફલમેવ ચ ।
યાનિ કૃત્યાનિ લોકેષુ સર્વ એષ રવિઃ પ્રભુઃ ॥ ૨૪ ॥

---

## ॥ ફલશ્રુતિઃ ॥

એનમાપત્સુ કૃચ્છ્રેષુ કાન્તારેષુભયેષુચ ।
કીર્તયન્ પુરુષઃ કશ્ચિન્નાવસીદતિ રાઘવ ॥ ૨૫ ॥

પૂજયસ્વૈનમેકાગ્રો દેવદેવં જગત્પતિમ્ ।
એતત્ ત્રિગુણિતં જપ્ત્વા યુદ્ધેષુ વિજયિષ્યસિ ॥ ૨૬ ॥

અસ્મિન્ ક્ષણે મહાબાહો રાવણં ત્વં વધિષ્યસિ ।
એવમુક્ત્વા તદાઽગસ્ત્યો જગામ ચ યથાગતમ્ ॥ ૨૭ ॥

એતચ્છ્રુત્વા મહાતેજા નષ્ટશોકોઽભવત્તદા ।
ધારયામાસ સુપ્રીતો રાઘવઃ પ્રયતાત્મવાન્ ॥ ૨૮ ॥

આદિત્યં પ્રેક્ષ્ય જપ્ત્વા તુ પરં હર્ષમવાપ્તવાન્ ।
ત્રિરાચમ્ય શુચિર્ભૂત્વા ધનુરાદાય વીર્યવાન્ ॥ ૨૯ ॥

રાવણં પ્રેક્ષ્ય હૃષ્ટાત્મા યુદ્ધાય સમુપાગમત્ ।
સર્વયત્નેન મહતા વધે તસ્ય ધૃતોઽભવત્ ॥ ૩૦ ॥

અથ રવિરવદન્નિરીક્ષ્ય રામં
મુદિતમનાઃ પરમં પ્રહૃષ્યમાણઃ ।
નિશિચરપતિસઙ્ક્ષયં વિદિત્વા
સુરગણમધ્યગતો વચસ્ત્વરેતિ ॥ ૩૧ ॥

## ॥ સરસ્વતિ પ્રાર્થના ॥

સરસ્વતી નમસ્તુભ્યં વરદે કામરૂપિણી ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૧ ॥

પદ્મપત્ર વિશાલાક્ષી પદ્મ કેસરવર્ણિની ।
નિત્યં પદ્માલયાદેવી સા મામ્પાતુ સરસ્વતી ॥ ૨ ॥

યાકુન્દેન્દુ તુષારહારધવળા યાશુભ્ર વસ્ત્રાન્વિતા
યાવીણા વરદણ્ડમણ્ડિતકરા યા શ્વેત પદ્માસના ।
યાબ્રહ્માચ્યુત શઙ્કરપ્રભૃતિભિર્દેવૈસ્સદા પૂજિતા
સામામ્પાતુ સરસ્વતી ભગવતી નિશ્શેષજાડ્યાપહા ॥ ૩ ॥

## ॥ વિઘ્નેશ્વર પ્રાર્થના ॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્ન વદનં ધ્યાયેત્ સર્વ વિઘ્નોપશાન્તયે ॥ ૧ ॥

અગજાનન પદ્માર્કં ગજાનન મહર્નિશમ્ ।
અનેકદન્તં ભક્તાનાં એકદન્તમુપાસ્મહે ॥ ૨ ॥

યં બ્રહ્મ વેદાન્તવિદો વદન્તિ
પરે પ્રધાનં પુરુષં તથાન્યે ।
વિશ્વોદ્ગતેઃ કારણમીશ્વરંવા
તસ્મૈ નમો વિઘ્નવિનાયકાય ॥ ૩ ॥

એકદન્તં મહાકાયં તપ્તકાંચન સન્નિભમ્ ।
લમ્બોદરં વિશાલાક્ષં વન્દેઽહં ગણનાયકમ્ ॥ ૪ ॥

મૌઞ્જી કૃષ્ણાજિનધરં નાગ યજ્ઞોપવીતિનમ્ ।
બાલેન્દુ શકલં મૌળૌ વન્દેઽહં ગણનાયકમ્ ॥ ૫ ॥

ચિત્રરત્ન વિચિત્રાઙ્ગ ચિત્રમાલા વિભૂષિતમ્ ।
કામરૂપધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૬ ॥

મૂષકોત્તમમારુહ્ય દેવાસુરમહાહવે ।
યોદ્ધુકામં મહાવીર્યં વન્દેઽહં ગણનાયકમ્ ॥ ૭ ॥

ગજવક્ત્રં સુરશ્રેષ્ઠં કર્ણચામર ભૂષિતમ્ ।
પાશાઙ્કુશધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૮ ॥

યક્ષકિન્નર ગન્ધર્વ સિદ્ધ વિદ્યાધરૈસ્સદા ।
સ્તૂયમાનં મહાબાહું વન્દેઽહં ગણનાયકમ્ ॥ ૯ ॥

અમ્બિકાહૃદયાનન્દં માતૃભિઃ પરિવેષ્ટિતમ્ ।
ભક્તપ્રિયં મદોન્મત્તં વન્દેઽહં ગણનાયકમ્ ॥ ૧૦ ॥

સર્વવિઘ્નકરં દેવં સર્વવિઘ્ન વિવર્જિતમ્ ।
સર્વસિદ્ધિપ્રદાતારં વન્દેઽહં ગણનાયકમ્ ॥ ૧૧ ॥

મૂષકવાહન મોદકહસ્ત ચામરકર્ણ વિલમ્બિતસૂત્ર ।
વામનરૂપ મહેશ્વર પુત્ર વિઘ્નવિનાયક પાદનમસ્તે ॥ ૧૨ ॥

ગજાનનં ભૂતગણાધિસેવિતમ્
કપિત્થ જમ્બૂફલસાર ભક્ષણમ્ ।
ઉમાસુતં શોકવિનાશકારણમ્
નમામિ વિઘ્નેશ્વર પાદપઙ્કજમ્ ॥ ૧૩ ॥

ગણાષ્ટકમિદમ્પુણ્યં યઃપઠેત્સતતં નરઃ ।
સિદ્ધ્યન્તિ સર્વકાર્યાણિ વિદ્યાવાન્ ધનવાન્ ભવેત્ ॥ ૧૪ ॥

અસ્મદ્ ગુરુભ્યો નમઃ ।
અસ્મત્પરમ ગુરુભ્યો નમઃ ।
અસ્મત્સર્વ ગુરુભ્યો નમઃ ।
શ્રીમતે શ્રી આદિવણ્ શઠકોપ યતીન્દ્ર મહા દેશિકાય નમઃ ।

યસ્યાભવદ્ભક્ત જનાર્તિહન્તુઃ
પિતૃત્વમન્યેષ્વવિચાર્ય તૂર્ણમ્ ।
સ્તમ્ભેઽવતારસ્તમનન્યલભ્યં
લક્ષ્મી નૃસિંહં શરણં પ્રપદ્યે ॥

શ્રીમાન્ વેઙ્કટ નાથાર્યઃ કવિતાર્કિક કેસરી ।
વેદાન્તા ચાર્ય વર્યોમે સન્નિધત્તાં સદાહૃદિ ॥

ગુરુભ્યસ્તદ્ ગુરુભ્યશ્ચ નમોવાકમધીમહે ।
વૃણીમહે ચ તત્રાદ્યૌ દમ્પતી જગતાં પતી ॥

શ્રીમન્નભીષ્ટ વરદ ।
ત્વામસ્મિ શરણં ગતઃ ॥

સ્વશેષ ભૂતેન મયા સ્વીયૈઃ સર્વ પરિચ્છદૈઃ ।
વિધાતું પ્રીતમાત્માનં દેવઃ પ્રક્રમતે સ્વયમ્ ।

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વ વિઘ્નોપશાન્તયે ॥

યસ્ય દ્વિરદ વક્ત્રાદ્યાઃ પારિષદ્યાઃ પરઃશતમ્ ।
વિઘ્નં નિઘ્નન્તિ સતતં વિષ્વક્સેનં તમાશ્રયે ॥

શ્રીહયગ્રીવસ્તોત્રમ્

જ્ઞાનાનન્દમયં દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૧ ॥

જ્ઞાનાનન્દમયં દેવં

સ્વતસ્સિદ્ધં શુદ્ધસ્ફટિક મણિભૂભૃત્પ્રતિભટં
સુધાસધ્રીચીભિર્દ્યુતિભિરવદાતત્રિભુવનમ્ ।
અનન્તૈસ્ત્રય્યન્તૈરનુવિહિત હેષાહલહલં
હતાશેષાવદ્યં હયવદનમીડીમહિ મહઃ ॥ ૨ ॥

સ્વતસ્સિદ્ધં શુદ્ધસ્ફટિક

સમાહારસ્સામ્નાં પ્રતિપદમૃચાં ધામ યજુષાં
લયઃ પ્રત્યૂહાનાં લહરિવિતતિર્બોધજલધેઃ ।
કથાદર્પક્ષુભ્યત્કથકકુલકોલાહલભવં
હરત્વન્તર્ધ્વાન્તં હયવદન હેષા હલહલઃ ॥ ૩ ॥

પ્રાચી સન્ધ્યા કાચિદન્તર્નિશાયાઃ

પ્રજ્ઞાદૃષ્ટેરઞ્જનશ્રીરપૂર્વા ।
વક્ત્રી વેદાન્ ભાતુ મે વાજિવક્ત્રા

વાગીશાખ્યા વાસુદેવસ્ય મૂર્તિઃ ॥ ૪ ॥

વિશુદ્ધ વિજ્ઞાનઘન સ્વરૂપં
વિજ્ઞાન વિશ્રાણન બદ્ધદીક્ષમ્ ।
દયાનિધિં દેહભૃતાં શરણ્યં
દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૫ ॥

અપૌરુષેયૈરપિ વાક્પ્રપઞ્ચૈઃ
અદ્યાપિ તે ભૂતિમદૃષ્ટપારામ્ ।
સ્તુવન્નહં મુગ્ધ ઇતિ ત્વયૈવ
કારુણ્યતો નાથ કટાક્ષણીયઃ ॥ ૬ ॥

દાક્ષિણ્યરમ્યા ગિરિશસ્ય મૂર્તિઃ
દેવી સરોજાસનધર્મપત્ની ।
વ્યાસાદયોઽપિ વ્યપદેશ્યવાચઃ
સ્ફુરન્તિ સર્વે તવ શક્તિલેશૈઃ ॥ ૭ ॥

મન્દોઽભવિષ્યન્નિયતં વિરિઞ્ચો
વાચાં નિધે વઞ્ચિત ભાગધેયઃ ।
દૈત્યાપનીતાન્ દયયૈવ ભૂયોઽપિ
અધ્યાપયિષ્યો નિગમાન્ ન ચેત્ ત્વામ્ ॥ ૮ ॥

વિતર્કડોલાં વ્યવધૂય સત્વે
બૃહસ્પતિં વર્તયસે યતસ્ત્વમ્ ।
તેનૈવ દેવ ત્રિદશેશ્વરાણામ્
અસ્પૃષ્ટ ડોલાયિતમાધિરાજ્યમ્ ॥ ૯ ॥

અગ્નૌઉ સમિદ્ધાર્ચિષિ સપ્તતન્તોઃ
આતસ્થિવાન્ મન્ત્રમયં શરીરમ્ ।
અખણ્ડ સારૈર્હવિષાં પ્રદાનૈઃ
આપ્યાયનં વ્યોમસદાં વિધત્સે ॥ ૧૦ ॥

યન્મૂલમીદૃક્ પ્રતિભાતિ તત્ત્વં
યા મૂલમામ્નાય મહાદ્રુમાણામ્ ।
તત્ત્વેન જાનન્તિ વિશુદ્ધ સત્વાઃ
ત્વામક્ષરામક્ષરમાતૃકાં તે ॥ ૧૧ ॥

અવ્યાકૃતાદ્ વ્યાકૃત વાનસિ ત્વં
નામાનિ રૂપાણિ ચ યાનિ પૂર્વમ્ ।
શંસન્તિ તેષાં ચરમાં પ્રતિષ્ટાં
વાગીશ્વર ત્વાં ત્વદુપજ્ઞવાચઃ ॥ ૧૨ ॥

મુગ્ધેન્દુ નિષ્યન્દ વિલોભનીયાં
મૂર્તિં તવાનન્દ સુધા પ્રસૂતિમ્ ।
વિપશ્ચિતશ્ચેતસિ ભાવયન્તે
વેલામુદારામિવ દુગ્ધસિન્ધોઃ ॥ ૧૩ ॥

મનોગતં પશ્યતિ યઃ સદા ત્વાં
મનીષિણાં માનસ રાજહંસમ્ ।
સ્વયં પુરોભાવ વિવાદભાજઃ
કિઙ્કુર્વતે તસ્ય ગિરો યથાર્હમ્ ॥ ૧૪ ॥

અપિ ક્ષણાર્ધં કલયન્તિ યે ત્વાં
આપ્લાવયન્તં વિશદૈર્મયૂખૈઃ ।
વાચાં પ્રવાહૈરનિવારિતૈસ્તે
મન્દાકિનીં મન્દયિતું ક્ષમન્તે ॥ ૧૫ ॥

સ્વામિન્ ભવદ્ધ્યાન સુધાભિષેકાત્
વહન્તિ ધન્યાઃ પુલકાનુબન્ધમ્ ।
અલક્ષિતે ક્વાપિ નિરૂઢમૂલં
અઙ્ગેષ્વિવાનન્દથુમ્ અઙ્કુરન્તમ્ ॥ ૧૬ ॥

સ્વામિન્ પ્રતીચા હૃદયેન ધન્યાઃ
ત્વદ્ધ્યન ચન્દ્રોદય વર્ધમાનમ્ ।
અમાન્તમાનન્દ પયોધિમન્તઃ
પયોભિરક્ષ્ણાં પરિવાહયન્તિ ॥ ૧૭ ॥

સ્વૈરાનુભાવાસ્ત્વદધીન ભાવાઃ
સમૃદ્ધવીર્યાસ્ત્વદનુગ્રહેણ ।
વિપશ્ચિતો નાથ તરન્તિ માયાં
વૈહારિકીં મોહન પિઞ્છિકાં તે ॥ ૧૮ ॥

પ્રાઙ્ નિર્મિતાનાં તપસાં વિપાકાઃ
પ્રત્યગ્રનિશ્શ્રેયસ સમ્પદો મે ।

સમેધિષીરંસ્તવ પાદપદ્મે
સઙ્કલ્પ ચિન્તામણયઃ પ્રણામાઃ ॥ ૧૯ ॥

વિલુપ્ત મૂર્ધન્ય લિપિક્રમાણાં
સુરેન્દ્ર ચૂડાપદ લાલિતાનામ્ ।
ત્વદઙ્ઘ્રિરાજીવ રજઃ કણાનાં
ભૂયાન્ પ્રસાદો મયિ નાથ ભૂયાત્ ॥ ૨૦ ॥

પરિસ્ફુરન્નૂપુરચિત્રભાનુ -
પ્રકાશ નિર્ધૂત તમોનુષઙ્ગામ્ ।
પદદ્વયીં તે પરિચિન્મહેઽન્તઃ
પ્રબોધ રાજીવ વિભાતસન્ધ્યામ્ ॥ ૨૧ ॥

ત્વત્કિઙ્કરાલઙ્કરણોચિતાનાં
ત્વયૈવ કલ્પાન્તર પાલિતાનામ્ ।
મઞ્જુપ્રણાદં મણિનૂપુરં તે
મઞ્જૂષિકાં વેદગિરાં પ્રતીમઃ ॥ ૨૨ ॥

સંચિન્તયામિ પ્રતિભાદશાસ્થાન્
સંધુક્ષયન્તં સમયપ્રદીપાન્ ।
વિજ્ઞાન કલ્પદ્રુમ પલ્લવાભં
વ્યાખ્યાન મુદ્રા મધુરં કરં તે ॥ ૨૩ ॥

ચિત્તે કરોમિ સ્ફુરિતાક્ષમાલં
સવ્યેતરં નાથ કરં ત્વદીયમ્ ।
જ્ઞાનામૃતોદઞ્ચન લમ્પટાનાં
લીલાઘટીયન્ત્રમિવાશ્રિતાનામ્ ॥ ૨૪ ॥

પ્રબોધ સિન્ધોરરુણૈઃ પ્રકાશૈઃ
પ્રવાલ સઙ્ઘાતમિવોદ્વહન્તમ્ ।
વિભાવયે દેવ સપુસ્તકં તે
વામં કરં દક્ષિણમાશ્રિતાનામ્ ॥ ૨૫ ॥

તમાંસિ ભિત્વા વિશદૈર્મયૂખૈઃ
સમ્પ્રીણયન્તં વિદુષશ્ચકોરાન્ ।
નિશામયે ત્વાં નવપુણ્ડરીકે
શરદ્ઘને ચન્દ્રમિવ સ્ફુરન્તમ્ ॥ ૨૬ ॥

દિશન્તુ મે દેવ સદા ત્વદીયાઃ
દયાતરઙ્ગાનુચરાઃ કટાક્ષાઃ ।
શ્રોત્રેષુ પુંસામમૃતં ક્ષરન્તીં
સરસ્વતીં સંશ્રિત કામધેનુમ્ ॥ ૨૭ ॥

વિશેષવિત્વારિષદેષુ નાથ
વિદગ્ધ ગોષ્ઠીસમરાઙ્ગણેષુ ।
જિગીષતો મે કવિતાર્કિકેન્દ્રાન્
જિહ્વાગ્ર સિંહાસનમભ્યુપેયાઃ ॥ ૨૮ ॥

ત્વાં ચિન્તયંસ્ત્વન્મયતાં પ્રપન્નઃ
ત્વામુદ્ગૃણન્ શબ્દમયેન ધામ્ના ।
સ્વામિન્ સમાજેષુ સમેધિષીય
સ્વચ્છન્દ વાદાહવ બદ્ધશૂરઃ ॥ ૨૯ ॥

નાનાવિધાનામગતિઃ કલાનાં
ન ચાપિ તીર્થેષુ કૃતાવતારઃ ।
ધ્રુવં તવાનાથપરિગ્રહાયાઃ
નવં નવં પાત્રમહં દયાયાઃ ॥ ૩૦ ॥

અકમ્પનીયાન્યપનીતિ ભેદૈઃ
અલંકૃષીરન્ હૃદયં મદીયમ્ ।
શઙ્કાકલઙ્કા પગમોજ્જ્વલાનિ
તત્ત્વાનિ સમ્યઞ્ચિ તવ પ્રસાદાત્ ॥ ૩૧ ॥

વ્યાખ્યા મુદ્રાં કરસરસિજૈઃ પુસ્તકં શઙ્ખચક્રે
બિભ્રદ્ભિન્નસ્ફટિકરુચિરે પુણ્ડરીકે નિષણ્ણઃ ।
અમ્લાનશ્રીરમૃતવિશદૈરંશુભિઃ પ્લાવયન્ માં
આવિર્ભૂયાદનઘ મહિમા માનસે વાગધીશઃ ॥ ૩૨ ॥

વ્યાખ્યા મુદ્રાં કરસરસિજૈઃ

વાગર્થ સિદ્ધિહેતોઃ
પઠત હયગ્રીવસંસ્તુતિં ભક્ત્યા ।
કવિતાર્કિક કેસરિણા
વેઙ્કટનાથેન વિરચિતામેતામ્ ॥ ૩૩ ॥

વાગર્થ સિદ્ધિહેતોઃ

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેङ્કટેશાય વેદાન્તગુરવે નમઃ ॥

## ॥ દશાવતાર સ્તોત્રમ્ ॥

શ્રીમાન્ વેङ્કટ નાથાર્યઃ કવિતાર્કિક કેસરી ।
વેદાન્તા ચાર્ય વર્યોમે સન્નિધત્તાં સદાહૃદિ ॥

દેવો નઃ શુભમાતનોતુ દશધા નિર્વર્તયન્ ભૂમિકાં
રઙ્ગે ધામનિ લબ્ધ નિર્ભર રસૈરધ્યક્ષિતો ભાવુકૈઃ ।
યદ્ભાવેષુ પૃથગ્વિધેષ્વનુગુણાન્ ભાવાન્ સ્વયં બિભ્રતી
યદ્ધર્મૈરિહ ધર્મિણી વિહરતે નાનાકૃતિર્નાયિકા ॥ ૧ ॥

દેવો નઃ શુભમાતનોતુ

નિર્મગ્ન શ્રુતિ જાલ માર્ગણ દશા દત્ત ક્ષણૈર્વીક્ષણૈઃ
અન્તસ્તન્વદિવારવિન્દ ગહનાન્યૌદન્વતીનામપામ્ ।
નિષ્પ્રત્યૂહ તરઙ્ગ રિઙ્ગણ મિથઃ પ્રત્યૂઢ પાથશ્છટા -
ડોલારોહ સદોહલં ભગવતો માત્સ્યં વપુઃ પાતુ નઃ ॥ ૨ ॥

અવ્યાસુર્ભુવન ત્રયીમનિભૃતં કણ્ડૂયનૈરદ્રિણા
નિદ્રાણસ્ય પરસ્ય કૂર્મ વપુષો નિશ્વાસ વાતોર્મયઃ ।
યદ્વિક્ષેપણ સંસ્કૃતો દધિપયઃ પ્રેઙ્ખોલપર્યઙ્કિકા -
નિત્યારોહણ નિર્વૃતો વિહરતે દેવઃ સહૈવ શ્રિયા ॥ ૩ ॥

ગોપાયેદનિશં જગન્તિ કુહના પોત્રી પવિત્રી કૃત -
બ્રહ્માણ્ડઃ પ્રલયોર્મિ ઘોષ ગુરુભિર્ઘોણા રવૈર્ઘુર્ઘુરૈઃ ।
યદ્દંષ્ટ્રાङ્કુર કોટિ ગાઢ ઘટના નિષ્કમ્પ નિત્ય સ્થિતિઃ
બ્રહ્મ સ્તમ્બમસૌદસૌ ભગવતી મુસ્તેવ વિશ્વમ્ભરા ॥ ૪ ॥

પ્રત્યાદિષ્ટ પુરાતન પ્રહરણ ગ્રામઃ ક્ષણં પાણિજૈઃ
અવ્યાત્ ત્રીણિ જગન્ત્યકુણ્ઠ મહિમા વૈકુણ્ઠ કણ્ઠીરવઃ ।

યત્પ્રાદુર્ભવનાદવન્ધ્ય જઠરા યાદૃચ્છિકાદ્ વેધસાં
યા કાચિત્ સહસા મહાસુર ગૃહ સ્થૂણા પિતામહ્યભૂત્ ॥ ૫ ॥

વ્રીડા વિદ્ધ વદાન્ય દાનવ યશો નાસીર ધાટી ભટઃ
ત્રૈયક્ષં મકુટં પુનન્નવતુ નસ્ત્રૈવિક્રમો વિક્રમઃ ।
યત્પ્રસ્તાવ સમુચ્છ્રિત ધ્વજ પટી વૃત્તાન્ત સિદ્ધાન્તિભિઃ
સ્રોતોભિઃ સુરસિન્ધુરષ્ટસુ દિશા સૌધેષુ દોધૂયતે ॥ ૬ ॥

ક્રોધાગ્નિં જમદગ્નિ પીડન ભવં સન્તર્પયિષ્યન્ ક્રમાત્
અક્ષત્રામપિ સન્તતક્ષ ય ઇમાં ત્રિઃસપ્ત કૃત્વઃ ક્ષિતિમ્ ।
દત્વા કર્મણિ દક્ષિણાં ક્વચન તામાસ્કન્ધ સિન્ધું વસન્
અબ્રહ્મણ્યમપાકરોતુ ભગવાનાબ્રહ્મ કીટં મુનિઃ ॥ ૭ ॥

પારાવાર પયો વિશોષણ કલા પારીણ કાલાનલ -
જ્વાલા જાલ વિહાર હારિ વિશિખ વ્યાપાર ઘોર ક્રમઃ ।
સર્વાવસ્થ સકૃત્પ્રપન્ન જનતા સંરક્ષણૈક વ્રતી
ધર્મો વિગ્રહવાનધર્મ વિરતિં ધન્વી સ તન્વીત નઃ ॥ ૮ ॥

ફક્કત્કૌરવ પટ્ટણ પ્રભૃતયઃ પ્રાસ્ત પ્રલમ્બાદયઃ
તાલાઙ્કસ્ય તથાવિધા વિહૃતયસ્તન્વન્તુ ભદ્રાણિ નઃ ।
ક્ષીરં શર્કરયેવ યાભિરપૃથગ્ભૂતાઃ પ્રભૂતૈર્ગુણૈઃ
આકૌમારકમસ્વદન્ત જગતે કૃષ્ણસ્ય તાઃ કેલયઃ ॥ ૯ ॥

નાથાયૈવ નમઃપદં ભવતુ નશ્ચિત્રૈશ્ચરિત્ર ક્રમૈઃ
ભૂયોભિર્ભુવનાન્યમૂનિ કુહના ગોપાય ગોપાયતે ।
કાલિન્દી રસિકાય કાલિય ફણિ સ્ફાર સ્ફટા વાટિકા -
રઙ્ગોત્સઙ્ગ વિશઙ્ક ચંક્રમધુરા પર્યાયચર્યા યતે ॥ ૧૦ ॥

ભાવિન્યા દશયા ભવન્નિહ ભવ ધ્વંસાય નઃ કલ્પતાં
કલ્કી વિષ્ણુયશસ્સુતઃ કલિ કથા કાલુષ્ય કૂલઙ્કષઃ ।
નિઃશેષ ક્ષત કણ્ટકે ક્ષિતિતલે ધારા જલૌઘૈર્ધ્રુવં
ધર્મં કાર્તયુગં પ્રરોહયતિ યન્નિસ્ત્રિંશ ધારાધરઃ ॥ ૧૧ ॥

ઇચ્છા મીન વિહાર કચ્છપ મહા પોત્રિન્ યદૃચ્છા હરે
રક્ષા વામન રોષ રામ કરુણા કાકુત્સ્થ હેલા હલિન્ ।
ક્રીડા વલ્લવ કલ્ક વાહન દશા કલ્કિન્નિતિ પ્રત્યહં
જલ્પન્તઃ પુરુષાઃ પુનન્તિ ભુવનં પુણ્યૌઘ પણ્યાપણાઃ ॥

વિદ્યોદન્વતિ વેઙ્કટેશ્વરકવૌ જાતં જગન્મઙ્ગલં
દેવેશસ્ય દશાવતાર વિષયં સ્તોત્રં વિવક્ષેત યઃ ।
વક્ત્રે તસ્ય સરસ્વતી બહુ મુખી ભક્તિઃ પરા માનસે
શુદ્ધિઃ કાપિ તનૌ દિશાસુ દશસુ ખ્યાતિઃ શુભા જૃમ્ભતે ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

---

## ॥ ન્યાસ દશકમ્ ॥

શ્રીમાન્ વેઙ્કટ નાથાર્યઃ કવિતાર્કિક કેસરી ।
વેદાન્તા ચાર્ય વર્યોમે સન્નિધત્તાં સદાહૃદિ ॥

અહં મદ્રક્ષણ ભરો મદ્રક્ષણ ફલં તથા ।
ન મમ શ્રીપતેરેવેત્યાત્માનં નિક્ષિપેદ્ બુધઃ ॥ ૧ ॥

ન્યસ્યામ્યકિઞ્ચનઃ શ્રીમન્નનુકૂલોઽન્યવર્જિતઃ ।
વિશ્વાસ પ્રાર્થના પૂર્વમ્ આત્મરક્ષા ભરં ત્વયિ ॥ ૨ ॥

સ્વામી સ્વશેષં સ્વવશં સ્વભરત્વેન નિર્ભરમ્ ।
સ્વદત્ત સ્વધિયા સ્વાર્થં સ્વસ્મિન્ ન્યસ્યતિ માં સ્વયમ્ ॥ ૩ ॥

શ્રીમન્નભીષ્ટ વરદ ત્વામસ્મિ શરણં ગતઃ ।
એતદ્દેહાવસાને માં ત્વત્પાદં પ્રાપય સ્વયમ્ ॥ ૪ ॥

ત્વચ્છેષત્વે સ્થિર ધિયં ત્વત્પ્રાપ્ત્યેક પ્રયોજનમ્ ।
નિષિદ્ધ કામ્ય રહિતં કુરુ માં નિત્ય કિઙ્કરમ્ ॥ ૫ ॥

દેવી ભૂષણ હેત્યાદિ જુષ્ટસ્ય ભગવંસ્તવ ।
નિત્યં નિરપરાધેષુ કૈંકર્યેષુ નિયુઙ્ક્ષ્વ મામ્ ॥ ૬ ॥

માં મદીયં ચ નિખિલં ચેતનાચેતનાત્મકમ્ ।
સ્વકૈંકર્યોપકરણં વરદ સ્વીકુરુ સ્વયમ્ ॥ ૭ ॥

ત્વદેકરક્ષ્યસ્ય મમ ત્વમેવ કરુણાકર ।
નપ્રવર્તય પાપાનિ પ્રવૃત્તાનિ નિવર્તય ॥ ૮ ॥

અકૃત્યાનાં ચ કરણં કૃત્યાનાં વર્જનં ચ મે ।
ક્ષમસ્વ નિખિલં દેવ પ્રણતાર્તિહર પ્રભો ॥ ૯ ॥

શ્રીમાન્ નિયત પઞ્ચાઙ્ગં મદ્રક્ષણ ભરાર્પણમ્ ।
અચીકરત્ સ્વયં સ્વસ્મિન્નતોઽહમિહ નિર્ભરઃ ॥ ૧૦ ॥

સંસારાવર્ત વેગ પ્રશમન શુભદૃગ્દેશિક પ્રેક્ષિતોઽહં
સન્ત્યક્તોઽન્યૈરુપાયૈરનુચિત ચરિતોષ્વદ્ય
શાન્તાભિસન્ધિઃ ।
નિઃશઙ્કુસ્તત્વદૃષ્ટ્યા નિરવધિકદયં પ્રાર્થ્ય
સંરક્ષકં ત્વાં
ન્યસ્ય ત્વત્પાદપદ્મે વરદ નિજભરં નિર્ભરો નિર્ભયોઽસ્મિ ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

---

## ॥ સુદર્શનાષ્ટકમ્ ॥

શ્રીમાન્ વેઙ્કટ નાથાર્યઃ કવિતાર્કિક કેસરી ।
વેદાન્તા ચાર્ય વર્યોમે સન્નિધત્તાં સદાહૃદિ ॥

પ્રતિભટ શ્રેણિ ભીષણ વર ગુણ સ્તોમ ભૂષણ
જનિભય સ્થાન તારણ  જગદવસ્થાન કારણ ।
નિખિલ દુષ્કર્મ કર્શન  નિગમ સદ્ધર્મ દર્શન
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્રન ॥ ૧ ॥

શુભ જગદ્રૂપ મણ્ડન  સુર ગણ ત્રાસ ખણ્ડન
શત-મખ બ્રહ્મ વન્દિત શત-પથ બ્રહ્મ નન્દિત ।
પ્રથિત વિદ્વત્સપક્ષિત  ભજદહિર્બુધ્ન્ય લક્ષિત
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શન ॥ ૨ ॥

સ્ફુટ તટિજ્જાલ પિઞ્જર પૃથુ-તર જ્વાલ પઞ્જર
પરિગત પ્રત્ન વિગ્રહ  પરિમિત પ્રજ્ઞ દુર્ગ્રહ ।
પ્રહરણ ગ્રામ મણ્ડિત પરિજનત્રાણ પણ્ડિત

જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૩ ॥

નિજ પદ પ્રીત સદ્ગણ નિરુપધિ સ્ફીત ષડ્જુણ
નિગમ નિર્વ્યૂઢ વૈભવ નિજ પર વ્યૂહ વૈભવ ।
હરિ હય દ્વેષિ દારણ  હર પુર પ્લોષ કારણ
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૪ ॥

દનુજ વિસ્તાર કર્તન  જનિ તમિસ્રા વિકર્તન
દનુજ વિદ્યા નિકર્તન  ભજદવિદ્યા નિવર્તન ।
અમર દૃષ્ટ સ્વ વિક્રમ  સમર જુષ્ટ ભ્રમિ ક્રમ
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૫ ॥

પ્રતિમુખાલીઢ બન્ધુર પૃથુ મહા હેતિ દન્તુર
વિકટ માયા બહિષ્કૃત  વિવિધ માલા પરિષ્કૃત ।
પૃથુ મહાયન્ત્ર તન્ત્રિત દૃઢ દયા તન્ત્ર યન્ત્રિત
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૬ ॥

મહિત સમ્પત્સદક્ષર  વિહિત સમ્પત્ષડક્ષર
ષડર ચક્ર પ્રતિષ્ટિત સકલ તત્ત્વ પ્રતિષ્ટિત ।
વિવિધ સઙ્કલ્પ કલ્પક  વિબુધ સઙ્કલ્પ કલ્પક
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૭ ॥

ભુવન નેતસ્ત્રયીમય  સવન તેજસ્ત્રયીમય
નિરવધિ સ્વાદુ ચિન્મય  નિખિલ શક્તે જગન્મય ।
અમિત વિશ્વ ક્રિયામય  શમિત વિષ્વગ્ભયામય
જય જય શ્રી સુદર્શન જય જય શ્રી સુદર્શ્ન ॥ ૮ ॥

દ્વિચતુષ્કમિદં પ્રભૂત સારં
પટતાં વેઙ્કટનાયક પ્રણીતં
વિષમેઽપિ મનોરથઃ પ્રધાવન્
ન વિહન્યેત રથાઙ્ગધુર્યગુપ્તઃ

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

## ॥ વૈરાગ્ય પઞ્ચકમ્ ॥

ક્ષોણી કોણ શતાંશ પાલન કલા દુર્વાર ગર્વાનલ-
ક્ષુભ્યત્ક્ષુદ્ર નરેન્દ્ર ચાટુ રચના ધન્યાન્ ન મન્યામહે ।
દેવં સેવિતુમેવ નિશ્ચિનુમહે યોઽસૌ દયાલુઃ પુરા
દાના મુષ્ટિમુચે કુચેલ મુનયે દત્તે સ્મ વિત્તેશતામ્ ॥ ૧ ॥

સિલં કિમનલં ભવેદનલમૌદરં બાધિતું
પયઃ પ્રસૃતિ પૂરકં કિમુ ન ધારકં સારસમ્ ।
અયત્ન મલ મલ્લકં પથિ પટચ્ચરં કચ્ચરં
ભજન્તિ વિબુધા મુધા હ્યહહ કુક્ષિતઃ કુક્ષિતઃ ॥ ૨ ॥

જ્વલતુ જલધિ ક્રોડ ક્રીડત્કૃપીડ ભવ પ્રભા-
પ્રતિભટ પટુ જ્વાલા માલાકુલો જઠરાનલઃ ।
તૃણમપિ વયં સાયં સમ્ફુલ્લ મલ્લિ મતલ્લિકા
પરિમલમુચા વાચા યાચામહે ન મહીશ્વરાન્ ॥ ૩ ॥

દુરીશ્વર દ્વાર બહિર્વિતર્દિકા-
દુરાસિકાયૈ રચિતોઽયમઞ્જલિઃ ।
યદઞ્જનાભં નિરપાયમસ્તિ મે
ધનઞ્જય સ્યન્દન ભૂષણં ધનમ્ ॥ ૪ ॥

શરીર પતનાવધિ પ્રભુ નિષેવણાપાદનાત્
અબિન્ધન ધનઞ્જય પ્રશમદં ધનં દન્ધનમ્ ।
ધનઞ્જય વિવર્ધનં ધનમુદૂઢ ગોવર્ધનં
સુસાધનમબાધનં સુમનસાં સમારાધનમ્ ॥ ૫ ॥

નાસ્તિ પિત્રાર્જિતં કિઞ્ચિન્ન મયા કિઞ્ચિદાર્જિતમ્ ।
અસ્તિ મે હસ્તિ શૈલાગ્રે વસ્તુ પૈતામહં ધનમ્ ॥ ૬ ॥

---

## ॥ શ્રીસ્તુતિઃ ॥

માનાતીત પ્રથિત વિભવાં મઙ્ગલં મઙ્ગલાનાં
વક્ષઃ પીઠીં મધુ વિજયિનો ભૂષયન્તીં સ્વકાન્ત્યા ।

પ્રત્યક્ષાનુશ્રવિક મહિમ પ્રાર્થિનીનાં પ્રજાનાં
શ્રેયો મૂર્તિ શ્રિયમશરણસ્ત્વાં શરણ્યાં પ્રપદ્યે ॥ ૧ ॥

આવિર્ભાવઃ કલશ જલધાવધ્વરે વાપિ યસ્યાઃ
સ્થાનં યસ્યાઃ સરસિજ વનં વિષ્ણુ વક્ષઃ સ્થલં વા ।
ભૂમા યસ્યા ભુવનમખિલં દેવિ દિવ્યં પદં વા
સ્તોક પ્રજ્ઞૈરનવધિ ગુણા સ્તૂયસે સા કથં ત્વમ્ ॥ ૨ ॥

સ્તોતવ્યત્વં દિશતિ ભવતી દેહિભિઃ સ્તૂયમાના
તામેવ ત્વામનિતર ગતિઃ સ્તોતુમાશંસમાનઃ ।
સિદ્ધારમ્ભઃ સકલ ભુવન શ્લાઘનીયો ભવેયં
સેવાપેક્ષા તવ ચરણયોઃ શ્રેયસે કસ્ય ન સ્યાત્ ॥ ૩ ॥

યત્સઙ્કલ્પાદ્ભવતિ કમલે યત્ર દેહિન્યમીષાં
જન્મ સ્થેમ પ્રલય રચના જઙ્ગમાજઙ્ગમાનામ્ ।
તત્ કલ્યાણં કિમપિ યમિનામેકલક્ષ્યં સમાધૌ
પૂર્ણં તેજઃ સ્ફુરતિ ભવતી પાદ લાક્ષા રસાઙ્કમ્ ॥ ૪ ॥

નિષ્પ્રત્યૂહ પ્રણય ઘટિતં દેવિ નિત્યાનપાયં
વિષ્ણુસ્ત્વં ચેત્યનવધિગુણં દ્વન્દ્વમન્યોન્ય લક્ષ્યમ્ ।
શેષશ્ચિત્તં વિમલ મનસાં મૌલયશ્ચ શ્રુતીનાં
સમ્પદ્યન્તે વિહરણ વિધૌ યસ્ય શય્યા વિશેષાઃ ॥ ૫ ॥

ઉદ્દેશ્યત્વં જનનિ ભજતોરુજ્ઝિતોપાધિ ગન્ધં
પ્રત્યગ્રૂપે હવિષિ યુવયોરેક શેષિત્વ યોગાત્ ।
પદ્મે પત્યુસ્તવ ચ નિગમૈર્નિત્યમન્વિષ્યમાણો
નાવચ્છેદં ભજતિ મહિમા નર્તયન્ માનસં નઃ ॥ ૬ ॥

પશ્યન્તીષુ શ્રુતિષુ પરિતઃ સૂરિ વૃન્દેન સાર્ધં
મધ્યે કૃત્ય ત્રિગુણ ફલકં નિર્મિત સ્થાન ભેદમ્ ।
વિશ્વાધીશ પ્રણયિનિ સદા વિભ્રમ દ્યૂત વૃત્તૌ
બ્રહ્મેશાદ્યા દધતિ યુવયોરક્ષ શાર પ્રચારમ્ ॥ ૭ ॥

અસ્યેશાના ત્વમસિ જગતઃ સંશ્રયન્તી મુકુન્દં
લક્ષ્મીઃ પદ્મા જલધિ તનયા વિષ્ણુ પત્નીન્દિરેતિ ।
યન્નામાનિ શ્રુતિ પરિપણાન્યેવમાવર્તયન્તો
નાવર્તન્તે દુરિત પવન પ્રેરિતે જન્મ ચક્રે ॥ ૮ ॥

ત્વામેવાહુઃ કતિચિદપરે ત્વત્પ્રિયં લોકનાથં
કિં તૈરન્તઃ કલહ મલિનૈઃ કિઞ્ચિદુત્તીર્ય મગ્નૈઃ ।
ત્વત્સમ્પ્રીત્યૈ વિહરતિ હરૌ સમ્મુખીનાં શ્રુતીનાં
ભાવારૂઢૌ ભગવતિ યુવાં દમ્પતી દૈવતં નઃ ॥ ૯ ॥

આપન્નાર્તિ પ્રશમન વિધૌ બદ્ધ દીક્ષસ્ય વિષ્ણોઃ
આચખ્યુસ્ત્વાં પ્રિય સહચરિમૈકમત્યોપપન્નામ્ ।
પ્રાદુર્ભાવૈરપિ સમ તનુઃ પ્રાધ્વમન્વીયસે ત્વં
દૂરોત્ક્ષિપ્તૈરિવ મધુરતા દુગ્ધરાશેસ્તરઙ્ગૈઃ ॥ ૧૦ ॥

ધત્તે શોભાં હરિ મરકતે તાવકી મૂર્તિરાદ્યા
તન્વી તુઙ્ગ સ્તનભર નતા તપ્ત જામ્બૂનદાભા ।
યસ્યાં ગચ્છન્ત્યુદય વિલયૈર્નિત્યમાનન્દ સિન્ધૌ
ઇચ્છા વેગોલ્લસિત લહરી વિભ્રમં વ્યક્તયસ્તે ॥ ૧૧ ॥

આસંસારં વિતતમખિલં વાઙ્મયં યદ્વિભૂતિઃ
યદ્ ભ્રૂ ભઙ્ગાત્ કુસુમ ધનુષઃ કિઙ્કરો મેરુ ધન્વા ।
યસ્યાં નિત્યં નયન શતકૈરેક લક્ષ્યો મહેન્દ્રઃ
પદ્મે તાસાં પરિણતિરસૌ ભાવ લેશૈસ્ત્વદીયૈઃ ॥ ૧૨ ॥

અગ્રે ભર્તુઃ સરસિજ મયે ભદ્ર પીઠે નિષણ્ણામ્
અમ્ભો રાશેરધિગત સુધા સમ્પ્લવાદુત્થિતાં ત્વામ્ ।
પુષ્પાસાર સ્થગિત ભુવનૈઃ પુષ્કલાવર્તકાદ્યૈઃ
કૢપ્તારમ્ભાઃ કનક કલશૈરભ્યષિઞ્ચન્ ગજેન્દ્રાઃ ॥ ૧૩ ॥

આલોક્ય ત્વામમૃત સહજે વિષ્ણુ વક્ષઃસ્થલસ્થાં
શાપાક્રાન્તાઃ શરણમગમન્ સાવરોધાઃ સુરેન્દ્રાઃ ।
લબ્ધ્વા ભૂયસ્ત્રિભુવનમિદં લક્ષિતં ત્વત્કટાક્ષૈઃ
સર્વાકાર સ્થિર સમુદયાં સમ્પદં નિર્વિશન્તિ ॥ ૧૪ ॥

આર્ત ત્રાણ વ્રતિભિરમૃતાસાર નીલામ્બુવાહૈઃ
અમ્ભોજાનામુષસિ મિષતામન્તરઙ્ગૈરપાઙ્ગૈઃ ।
યસ્યાં યસ્યાં દિશિ વિહરતે દેવિ દૃષ્ટિસ્ત્વદીયા
તસ્યાં તસ્યામહમહમિકાં તન્વતે સમ્પદોઘાઃ ॥ ૧૫ ॥

યોગારમ્ભ ત્વરિત મનસો યુષ્મદૈકાન્ત્ય યુક્તં

ધર્મં પ્રાપ્તું પ્રથમમિહ યે ધારયન્તે ધનાયામ્ ।
તેષાં ભૂમેર્ધનપતિગૃહાદમ્બરાદમ્બુધેર્વા
ધારા નિર્યાન્ત્યધિકમધિકં વાઞ્છિતાનાં વસૂનામ્ ॥ ૧૬ ॥

શ્રેયસ્કામાઃ કમલનિલયે ચિત્રમામ્નાય વાચાં
ચૂડાપીડં તવ પદ યુગં ચેતસા ધારયન્તઃ ।
છત્ર ચ્છાયા સુભગ શિરસશ્ચામર સ્મેર પાર્શ્વાઃ
શ્લાઘાશબ્દ શ્રવણ મુદિતાઃ સ્રગ્વિણઃ સઞ્ચરન્તિ ॥ ૧૭ ॥

ઊરીકર્તું કુશલમખિલં જેતુમાદીનરાતીન્
દૂરીકર્તું દુરિત નિવહં ત્યક્તુમાદ્યામવિદ્યામ્ ।
અમ્બ સ્તમ્બાવધિક જનન ગ્રામ સીમાન્ત રેખામ્
આલમ્બન્તે વિમલ મનસો વિષ્ણુ કાન્તે દયાં તે ॥ ૧૮ ॥

જાતાકાઙ્ક્ષા જનનિ યુવયોરેક સેવાધિકારે
માયાલીઢં વિભવમખિલં મન્યમાનાસ્તૃણાય ।
પ્રીત્યૈ વિષ્ણોસ્તવ ચ કૃતિનઃ પ્રીતિમન્તો ભજન્તે
વેલાભઙ્ગઃ પ્રશમન ફલં વૈદિકં ધર્મસેતુમ્ ॥ ૧૯ ॥

સેવે દેવિ ત્રિદશ મહિલા મૌલિ માલાર્ચિતં તે
સિદ્ધિ ક્ષેત્રં શમિત વિપદાં સમ્પદાં પાદ પદ્મમ્ ।
યસ્મિન્નીષન્નમિત શિરસો યાપયિત્વા શરીરં
વર્તિષ્યન્તે વિતમસિ પદે વાસુદેવસ્ય ધન્યાઃ ॥ ૨૦ ॥

સાનુપ્રાસ પ્રકટિત દયૈઃ સાન્દ્ર વાત્સલ્ય દિગ્ધૈઃ
અમ્બ સ્નિગ્ધૈરમૃત લહરી લબ્ધ સબ્રહ્મચર્યઈઃ ।
ધર્મે તાપ ત્ર ય વિરચિતે ગાઢ તપ્તં ક્ષણં મામ્
આકિઞ્ચન્ય ગ્લપિતમનઘૈરાર્દ્રયેથાઃ કટાક્ષૈઃ ॥ ૨૧ ॥

સમ્પદ્યન્તે ભવ ભય તમી ભાનવસ્ત્વત્પ્રસાદાત્
ભાવાઃ સર્વે ભગવતિ હરૌ ભક્તિમુદ્વેલયન્તઃ ।
યાચે કિં ત્વામહમિહ યતઃ શીતલોદાર શીલા
ભૂયો ભૂયો દિશસિ મહતાં મઙ્ગલાનાં પ્રબન્ધાન્ ॥ ૨૨ ॥

માતા દેવિ ત્વમસિ ભગવાન્ વાસુદેવઃ પિતા મે
જાતઃ સોઽહં જનનિ યુવયોરેકલક્ષ્યં દયાયાઃ ।
દત્તો યુષ્મત્પરિજનતયા દેશિકૈરપ્યતસ્ત્વં

કિં તે ભૂયઃ પ્રિયમિતિ કિલ સ્મેર વક્ત્રા વિભાસિ ॥ ૨૩ ॥

કલ્યાણાનામવિકલ નિધિઃ કાઽપિ કારુણ્ય સીમા
નિત્યામોદા નિગમ વચસાં મૌલિ મન્દાર માલા ।
સમ્પદ્દિવ્યા મધુ વિજયિનઃ સન્નિધત્તાં સદા મે
સૈષા દેવી સકલ ભુવન પ્રાર્થના કામધેનુઃ ॥ ૨૪ ॥

ઉપચિત ગુરુ ભક્તેરુત્થિતં વેઙ્કટેશાત્
કલિ કલુષ નિવૃત્ત્યૈ કલ્પમાનં પ્રજાનામ્ ।
સરસિજ નિલયાયાઃ સ્તોત્રમેતત્ પઠન્તઃ
સકલ કુશલ સીમાઃ સાર્વભૌમા ભવન્તિ ॥ ૨૫ ॥

## ॥ ગોદા સ્તુતિઃ ॥

શ્રીવિષ્ણુચિત્ત કુલ નન્દન કલ્પવલ્લીં
શ્રીરઙ્ગરાજ હરિચન્દન યોગ દૃશ્યમ્ ।
સાક્ષાત્ શમાં કરુણયા કમલામિવાન્યાં
ગોદામનન્યશરણઃ શરણં પ્રપદ્યે ॥ ૧ ॥

વૈદેશિકઃ શ્રુતિ ગિરામપિ ભૂયસીનાં
વર્ણેષુ માતિ મહિમા ન હિ માદૃશાં તે ।
ઇત્થં વિદન્તમપિ માં સહસૈવ ગોદે
મૌન દ્રુહો મુખરયન્તિ ગુણાસ્ત્વદીયાઃ ॥ ૨ ॥

ત્વત્પ્રેયસઃ શ્રવણયોરમૃતાયમાનાં
તુલ્યાં ત્વદીય મણિ નૂપુર શિઞ્જિતાનામ્ ।
ગોદે ત્વમેવ જનનિ ત્વદભિષ્ટવાર્હાં
વાચં પ્રસન્ન મધુરાં મમ સંવિધેહિ ॥ ૩ ॥

કૃષ્ણાન્વયેન દધતીં યમુનાનુભાવં
તીર્થૈર્યથાવદવગાહ્ય સરસ્વતીં તે ।
ગોદે વિકસ્વર ધિયાં ભવતી કટાક્ષાત્
વાચઃ સ્ફુરન્તિ મકરન્દ મુચઃ કવીનામ્ ॥ ૪ ॥

અસ્માદૃશામપકૃતૌ ચિર દીક્ષિતાનાં

અહ્નાય દેવિ દયતે યદસૌ મુકુન્દઃ ।
તન્નિશ્ચિતં નિયમિતસ્તવ મૌલિ દામ્ના
તન્ત્રી નિનાદમધુરૈશ્ચ ગિરાં નિગુમ્ભૈઃ ॥ ૫ ॥

શોણાઽધરેઽપિ કુચયોરપિ તુઙ્ગભદ્રા
વાચાં પ્રવાહનિવહેઽપિ સરસ્વતી ત્વમ્ ।
અપ્રાકૃતૈરપિ રસૈર્વિરજા સ્વભાવાત્
ગોદાઽપિ દેવિ કમિતુર્નનુ નર્મદાઽસિ ॥ ૬ ॥

વલ્મીકતઃ શ્રવણતો વસુધાત્મનસ્તે
જાતો બભૂવ સ મુનિઃ કવિ સાર્વભૌમઃ ।
ગોદે કિમદ્ભુતમિદં યદમી સ્વદન્તે
વક્ત્રારવિન્દ મકરન્દ નિભાઃ પ્રબન્ધાઃ ॥ ૭ ॥

ભોક્તું તવ પ્રિયતમં ભવતીવ ગોદે
ભક્તિં નિજાં પ્રણય ભાવનયા ગૃણન્તઃ ।
ઉચ્ચાવચૈર્વિરહ સઙ્ગમજૈરુદન્તૈઃ
શ‍ૃઙ્ગારયન્તિ હૃદયં ગુરવસ્ત્વદીયાઃ ॥ ૮ ॥

માતઃ સમુત્થિતવતીમધિ વિષ્ણુચિત્તં
વિશ્વોપજીવ્યમમૃતં વચસા દુહાનામ્ ।
તાપચ્છિદં હિમ રુચેરિવ મૂર્તિમન્યાં
સન્તઃ પયોધિ દુહિતુઃ સહજાં વિદુસ્ત્વામ્ ॥ ૯ ॥

તાતસ્તુ તે મધુભિદઃ સ્તુતિ લેશ વશ્યાત્
કર્ણામૃતૈઃ સ્તુતિ શતૈરનવાપ્ત પૂર્વમ્ ।
ત્વન્મૌલિ ગન્ધ સુભગામુપહૃત્ય માલાં
લેભે મહત્તર પદાનુગુણં પ્રસાદમ્ ॥ ૧૦ ॥

દિક્ દક્ષિણાઽપિ પરિ પક્ત્રિમ પુણ્ય લભ્યાત્
સર્વોત્તરા ભવતિ દેવિ તવાવતારાત્ ।
યત્રૈવ રઙ્ગપતિના બહુમાન પૂર્વં
નિદ્રાલુનાપિ નિયતં નિહિતાઃ કટાક્ષાઃ ॥ ૧૧ ॥

પ્રાયેણ દેવિ ભવતી વ્યપદેશ યોગાત્
ગોદાવરી જગદિદં પયસા પુનીતે ।
યસ્યાં સમેત્ય સમયેષુ ચિરં નિવાસાત્

ભાગીરથી પ્રભૃતયોઽપિ ભવન્તિ પુણ્યાઃ ॥ ૧૨ ॥

નાગે શયઃ સુતનુ પક્ષિરથઃ કથં તે
જાતઃ સ્વયંવર પતિઃ પુરુષઃ પુરાણઃ ।
એવં વિધાઃ સમુચિતં પ્રણયં ભવત્યાઃ
સન્દર્શયન્તિ પરિહાસ ગિરઃ સખીનામ્ ॥ ૧૩ ॥

ત્વદ્ભુક્ત માલ્ય સુરભીકૃત ચારુ મૌલેઃ
હિત્વા ભુજાન્તર ગતામપિ વૈજયન્તીમ્ ।
પત્યુસ્તવેશ્વરિ મિથઃ પ્રતિઘાત લોલાઃ
બર્હાતપત્ર રુચિમારચયન્તિ ભૃઙ્ગાઃ ॥ ૧૪ ॥

આમોદવત્યપિ સદા હૃદયં ગમાઽપિ
રાગાન્વિતાઽપિ લલિતાઽપિ ગુણોત્તરાઽપિ ।
મૌલિ સ્રજા તવ મુકુન્દ કિરીટ ભાજા
ગોદે ભવત્યધરિતા ખલુ વૈજયન્તી ॥ ૧૫ ॥

ત્વન્મૌલિ દામનિ વિભોઃ શિરસા ગૃહીતે
સ્વચ્છન્દ કલ્પિત સપીતિ રસ પ્રમોદાઃ ।
મઞ્જુ સ્વના મધુ લિહો વિદધુઃ સ્વયં તે
સ્વાયંવરં કમપિ મઙ્ગલ તૂર્ય ઘોષમ્ ॥ ૧૬ ॥

વિશ્રાયમાન રજસા કમલેન નાભૌ
વક્ષઃસ્થલે ચ કમલા સ્તન ચન્દનેન ।
આમોદિતોઽપિ નિગમૈર્વિભુરઙ્ઘ્રિ યુગ્મે
ધત્તે નતેન શિરસા તવ મૌલિ માલામ્ ॥ ૧૭ ॥

ચૂડા પદેન પરિગૃહ્ય તવોત્તરીયં
માલામપિ ત્વદલકૈરધિવાસ્ય દત્તામ્ ।
પ્રાયેણ રઙ્ગપતિરેષ બિભર્તિ ગોદે
સૌભાગ્ય સમ્પદભિષેક મહાધિકારમ્ ॥ ૧૮ ॥

તુઙ્ગૈરકૃત્રિમ ગિરઃ સ્વયમુત્તમાઙ્ગૈઃ
યં સર્વગન્ધ ઇતિ સાદરમુદ્વહન્તિ ।
આમોદમન્યમધિગચ્છતિ માલિકાભિઃ
સોઽપિ ત્વદીય કુટિલાલક વાસિતાભિઃ ॥ ૧૯ ॥

ધન્યે સમસ્ત જગતાં પિતુરુત્તમાઙ્ગે
ત્વન્મૌલિમાલ્ય ભર સમ્ભરણેન ભૂયઃ ।
ઇન્દીવર સ્રજમિવાદધતિ ત્વદીયાનિ
આકેકરાણિ બહુમાન વિલોકિતાનિ ॥ ૨૦ ॥

રઙ્ગેશ્વરસ્ય તવ ચ પ્રણયાનુબન્ધાત્
અન્યોન્ય માલ્ય પરિવૃત્તિમભિષ્ટુવન્તઃ ।
વાચાલયન્તિ વસુધે રસિકાસ્ત્રિલોકીં
ન્યૂનાધિકત્વ સમતા વિષયૈર્વિવાદૈઃ ॥ ૨૧ ॥

દૂર્વા દલ પ્રતિમયા તવ દેહ કાન્ત્યા
ગોરોચના રુચિરયા ચ રુચેન્દિરાયાઃ ।
આસીદનુજ્ઝિત શિખાવલ કણ્ઠ શોભં
માઙ્ગલ્યદં પ્રણમતાં મધુવૈરિ ગાત્રમ્ ॥ ૨૨ ॥

અર્ચ્યં સમર્ચ્ય નિયમૈર્નિગમ પ્રસૂનૈઃ
નાથં ત્વયા કમલયા ચ સમેયિવાંસમ્ ।
માતશ્ચિરં નિરવિશન્ નિજમાધિરાજ્યં
માન્યા મનુ પ્રભૃતયોઽપિ મહીક્ષિતસ્તે ॥ ૨૩ ॥

આર્દ્રાપરાધિનિ જનેઽપ્યભિરક્ષણાર્થં
રઙ્ગેશ્વરસ્ય રમયા વિનિવેદ્યમાને ।
પાર્શ્વે પરત્ર ભવતી યદિ તત્ર નાસીત્
પ્રાયેણ દેવિ વદનં પરિવર્તિતં સ્યાત્ ॥ ૨૪ ॥

ગોદે ગુણૈરપનયન્ પ્રણતાપરાધાન્
ભ્રૂક્ષેપ એવ તવ ભોગ રસાનુકૂલઃ ।
કર્માનુબન્ધિ ફલ દાન રતસ્ય ભર્તુઃ
સ્વાતન્ત્ર્ય દુર્વ્યસન મર્મ ભિદા નિદાનમ્ ॥ ૨૫ ॥

રઙ્ગે તટિદ્ગુણવતો રમયૈવ ગોદે
કૃષ્ણામ્બુદસ્ય ઘટિતાં કૃપયા સુવૃષ્ટ્યા ।
દૌર્ગત્ય દુર્વિષ વિનાશ સુધા નદીં ત્વાં
સન્તઃપ્રપદ્ય શમયન્ત્યચિરેણ તાપાન્ ॥ ૨૬ ॥

જાતાપરાધમપિ મામનુકમ્પ્ય ગોદે
ગોપ્ત્રી યદિ ત્વમસિ યુક્તમિદં ભવત્યાઃ ।

વાત્સલ્ય નિર્ભરતયા જનની કુમારં
સ્તન્યેન વર્ધયતિ દષ્ટ પયોધરાઽપિ ॥ ૨૭ ॥

શતમખ મણિ નીલા ચારુ કલ્હાર હસ્તા
સ્તન ભર નમિતાઙ્ગી સાન્દ્ર વાત્સલ્ય સિન્ધુઃ ।
અલક વિનિહિતાભિઃ સ્રગ્ભિરાકૃષ્ટ નાથા
વિલસતુ હૃદિ ગોદા વિષ્ણુચિત્તાત્મજા નઃ ॥ ૨૮ ॥

ઇતિ વિકસિત ભક્તેરુત્થિતાં વેઙ્કટેશાત્
બહુગુણ રમણીયાં વક્તિ ગોદાસ્તુતિં યઃ ।
સ ભવતિ બહુમાન્યઃ શ્રીમતે રઙ્ગભર્તુઃ
ચરણ કમલ સેવાં શાશ્વતીમભ્યુપૈષ્યન્ ॥ ૨૯ ॥

---

## ॥ ચતુઃસ્લોકી ॥

કાન્તસ્તે પુતુષોત્તમઃ ફણિપતિઃ શય્યાઽસનં વાહનં
વેદાત્મા વિહગેશ્વરો યવનિકા માયા જગન્મોહિની ।
બ્રહ્મેશાદિસુરવ્રજઃ સદયિતઃ ત્વદ્દાસદાસીગણઃ
શ્રીરિત્યેવ ચ નામ તે ભગવતિ ! બ્રૂમઃ કથં ત્વાં વયમ્ ॥ ૧ ॥

યસ્યાસ્તે મહિમાનમાત્મન ઇવ ત્વદ્વલ્લભોઽપિ પ્રભુઃ
નાલં માતુમિયત્તયા નિરવધિં નિત્યાનુકૂલં સ્વતઃ ।
તાં ત્વાં દાસ ઇતિ પ્રપન્ન ઇતિ ચ સ્તોષ્યામ્યહં નિર્ભયઃ
લોકૈકેશ્વરિ ! લોકનાથદયિતે ! દાન્તે દયાં તે વિદન્ ॥ ૨ ॥

ઈષત્ ત્વત્કરુણાનિરીક્ષણસુધાસન્ધુક્ષણાદ્રક્ષ્યતે
નષ્ટં પ્રાક્ તદલાભતસ્ત્રિભુવનં સમ્પ્રત્યનન્તોદયમ્ ।
શ્રેયો ન હ્યરવિન્દલોચનમનઃકાન્તાપ્રસાદાદૃતે
સંસૃત્યક્ષરવૈષ્ણવાધ્વસુ નૃણાં સમ્ભાવ્યતે કર્હિચિત્ ॥ ૩ ॥

શાન્તાનન્તમહાવિભૂતિ પરમં યદ્ બ્રહ્મ રૂપં હરેઃ
મૂર્તં બ્રહ્મ તતોઽપિ તત્પ્રિયતરં રૂપં યદત્યદ્ભુતમ્ ।
યાન્યન્યાનિ યથાસુખં વિહરતો રૂપાણિ સર્વાણિ તા -
ન્યાહુઃ સ્વૈરનરૂપરૂપવિભવૈર્ગાઢોપગૂઢાનિ તે ॥ ૪ ॥

## ॥ નન્દનન્દન શ્રીકૃષ્ણાષ્ટકમ્ ॥

ભજે વ્રજૈકમંડનં સમસ્તપાપખણ્ડનં
સ્વભક્તચિત્તરંજનં સદૈવ નન્દનન્દનમ્ ।
સુપિચ્છગુચ્છ-મસ્તકં સુનાદવેણુહસ્તકં
અનંગરંગસાગરં નમામિ કૃષ્ણ-નાગરમ્ ॥ ૧ ॥

મનોજ-ગર્વમોચનં વિશાલ-લોલ-લોચનં
વિધૂતગોપશોચનં નમામિ પદ્મલોચનમ્ ।
કરારવિન્દભૂવરં સ્મિતાવલોકસુન્દરં
મહેન્દ્રમાનદારણં નમામિ કૃષ્ણવારણમ્ ॥ ૨ ॥

કદમ્બસૂનકુણ્ડલં સચારુગણ્ડમણ્ડલં
વ્રજાઙ્ગનૈકવલ્લભં નમામિ કૃષ્ણ-દુર્લભમ્ ।
યશોદયા સમોદયા સગોપયા સનન્દયા
યુતં સુખૈકદાયકં નમામિ ગોપનાયકમ્ ॥ ૩ ॥

સદૈવ પાદપંકજં મદીયમાનસે નિજં
દધાનમુત્તમાલકં નમામિ નન્દબાલકમ્ ।
સમસ્તદોષ-શોષણં સમસ્તલોકપોષણં
સમસ્તગોપ-માનસં નમામિ કૃષ્ણલાલસમ્ ॥ ૪ ॥

ભુવો ભરાવતારકં ભવાબ્ધિકર્ણધારકં
યશોમતી-કિશૂ-રકં નમામિ દુગ્ધચોરકમ્ ।
દૃગન્તકાન્તભંગિનં સદાસદાલસંગિનં
દિનેદિને નવં નવં નમામિ નન્દસમ્ભવમ્ ॥ ૫ ॥

ગુણાકરં સુખાકરં કૃપાકરં કૃપાવરં
સુરદ્વિષ-ન્નિકન્દનં નમામિ ગોપનન્દનમ્ ।
નવીનગોપનાગરં નવીનકેલિ-લમ્પટં
નમામિ મેઘસુન્દરં તડિત્પ્રભાલસત્પટમ્ ॥ ૬ ॥

સમસ્તગોપનન્દનં હૃદમ્બુજૈકમોહનં
નમામિ કુંજમધ્યગં પ્રસન્નભાનુશોભનમ્ ।

નિકામ-કામદાયકં દૃગન્તચારુ-સાયકં
રસાલવેણુ-ગાયકં નમામિ કુંજનાયકમ્ ॥ ૭ ॥

વિદગ્ધ-ગોપિકા-મનો-મનોજ્ઞતલ્પ-શાયિનં
નમામિ કુંજકાનને પ્રવૃદ્ધ-વહ્નિ-પાયિનમ્ ।
યદા તદા યથા તથા તથૈવ કૃષ્ણસત્કથા
મયા સદૈવ ગીયતાં તથા કૃપા વિધીયતામ્ ।
પ્રમાણિકાષ્ટકદ્વયં જપત્યધીત્ય યઃ પુમાન્
ભવેત્ સ નન્દનન્દને ભવે ભવે સુભક્તિમાન્ ॥ ૮ ॥

---

## ॥ ગજેન્દ્ર મોક્ષમ્ ॥

ગ્રાહગ્રસ્તે ગજેન્દ્રે રુવતિ સરભસં તાર્ક્ષ્ય મારુહ્ય ધાવન્
વ્યાઘૂર્ણન્ માલ્યભૂષા વસન પરિકરો મેઘ ગમ્ભીર ઘોષઃ ।
આબિભ્રાણો રથાઙ્ગં શરમસિ મભયં શઙ્ખ ચાપૌ સખેટૌ
હસ્તૈઃ કૌમોદકી મપ્યવતુ હરિરસા વંહસાં સંહતેર્નઃ ॥

નક્રાક્રાન્તે કરીન્દ્રે મુકુળિત નયને મૂલ મૂલેતિખિન્ને
નાહં નાહં નચાહં ન ચ ભવતિ પુનસ્તાદૃશો માદૃશેષુ
ઇત્યેવં ત્યક્તહસ્તે સપદિ સુરગણે ભાવ શૂન્યે સમસ્તે
મૂલં યત્પ્રાદુરાસીત્ સ દિશતુ ભગવાન્ મઙ્ગળં સન્તતં નઃ ॥

---

## ॥ શ્લોકત્રયમ્ ॥

પ્રાતઃ સ્મરામિ ભવભીતિ મહાર્તિ શાન્ત્યૈ
નારાયણં ગરુડ વાહન મઞ્જનાભમ્ ।
ગ્રાહાભિ ભૂત મદવારણ મુક્તિ હેતું
ચક્રાયુધં તરુણ વારિજ પત્રનેત્રમ્ ॥

પ્રાતર્નમામિ મનસા વચસા ચ મૂર્ધ્ના
પાદારવિન્દ યુગળં પરમસ્ય પુંસઃ ।

નારાયણસ્ય નરકાર્ણવ તારણસ્ય
પારાયણ પ્રવણ વિપ્ર પરાયણસ્ય ॥

પ્રાતર્ભજામિ ભજતા મભયં કરં તં
પ્રાક્ સર્વ જન્મ કૃત પાપ ભયાપનુત્યૈ ।
યો ગ્રાહવક્ત્ર પતિતાન્ઘ્રિ ગજેન્દ્ર ઘોર
શોક પ્રણાશન કરો ધૃત શઙ્ખ ચક્રઃ ॥

શ્લોકત્રયમિદં પુણ્યં પ્રાતરુત્થાય યઃ પઠેત્
લોકત્રય ગુરુસ્તસ્મૈ દધ્યાદાત્મપદં હરિઃ ॥

સર્વં શ્રી કૃષ્ણાર્પણમસ્તુ

From Sri T. R. Chari's Stotra site at
http://www.geocities.com/Athens/Delphi/2627/indextml

These pages are maintained as a small step in fostering sanAtana sAmpradAyam.

ITRANS transliteration scheme has been generally followed for all
Sanskrit words written in Roman script, and adapted where appropriate,
for easy reading.

As with any work of this nature, there is always scope for
improvement. Suggestions and any typographical corrections in the stotram texts may
be forwarded to trchari at hotmail.com

*Sri T R Chari's stotra collection*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*